National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 233-236
© 2026 NJHSR
www.sanskritarticle.com

**हरिश्चंद्र मालू गवस**
शोधच्छात्रः, व्याकरण-विभागः,
कवि-कुलगुरु-कालिदास-संस्कृत -
विश्वविद्यालयः,रामटेक - नागपूरम्

**मार्गदर्शकः**
**प्रो.हरेकृष्ण अगस्ती**
अधिष्ठाता-वेदविद्या-सङ्काय-प्रमुखः,
कवि-कुलगुरु-कालिदास-संस्कृत-
विश्वविद्यालयः, रामटेक-नागपूरम्

**Correspondence:**
**हरिश्चंद्र मालू गवस**
शोधच्छात्रः, व्याकरण-विभागः,
कवि-कुलगुरु-कालिदास-संस्कृत -
विश्वविद्यालयः,रामटेक - नागपूरम्

# सामवेदीय-ऋक्तन्त्रोक्तवर्णोच्चारणविधीनां विमर्शः

**हरिश्चंद्र मालू गवस, प्रो.हरेकृष्ण अगस्ती**

**शोधसारः**

ऋक्तन्त्रप्रातिशाख्यं सामवेदीयप्रातिशाख्यं वर्तते। वेदोच्चारणविधौ प्रातिशाख्यग्रन्थाः मौलिभूताः सन्ति। ऋक्तन्त्रप्रातिशाख्यस्य सम्बन्धः राणायनीयकौथुमशाखाभ्यां सह वर्तते। प्रातिशाख्यमिदं सामवेदीयमन्त्रेष्वागतानां पदानां विषये, विशेषनियमान् प्रतिपादयति। अनेन ऋक्तन्त्रप्रातिशाख्येन सामपदोच्चारणविधीनां, सन्धिविषयानां, स्वरभेदानाञ्च ज्ञानं भवति ।

सामवेदीयनारदीयशिक्षायां प्राधान्येन त्रीणि उच्चारणस्थानानि उक्तानि। तथा च गौणस्थानानि विस्तरेण प्रतिपादितानि। परञ्च शिक्षाग्रन्थभेदाद् उच्चारणवर्णस्थानादीषु वैषम्यं दरीदृश्यते। अत एव सामवेदपाठकान् सन्देहं भवितुमर्हति। तदर्थं प्राचीनप्रमाणैः सूत्रैश्च ऋक्तन्त्रप्रातिशाख्ये वर्णस्थानानां विषये सारगर्भितविशेषाधारितसूत्राणि प्रतिपादितानि।

वेदस्य प्रत्येकं शिक्षासु वर्णस्थानविषये उच्चारणविषये किञ्चित् वैषम्यं प्रतीयते ऋक्तन्त्रप्रातिशाख्ये वर्णस्थानानां ससूत्रैः चिन्तनं वर्तते। ऋक्तन्त्रप्रातिशाख्यस्य अनध्ययनात् वा काठिन्यादस्य प्रचारो नैव जातः। दीर्घकालानध्ययनात्, व्याकरणानभ्यासात् वा कालेन (समयेन) मन्त्रोच्चारणे प्रायः अध्येतॄणां सामवेदीयच्छात्राणां दोषाः भवन्ति। एतान् दोषान् निराकरणार्थं सामवेदप्रातिशाख्यानां संरक्षणार्थं तथा व्याकरणनियमानां ज्ञानं परमावश्यकं वर्तते। अत एव सम्प्रति सामवेदीयऋक्तन्त्रप्रातिशाख्यस्य प्रचारोऽपेक्षते। अतः शोधपत्रेऽस्मिन् सामवेदीय-ऋक्तन्त्रोक्तवर्णस्थानानां, वर्णोच्चारणविधीनाञ्चविमर्शः क्रियते।

**भूमिका-**

**"वेदोऽखिलो धर्ममूलम्"** वेद एव निखिलधर्माणां मूलं वर्तते। वेदो नाम ज्ञानराशिः। वेद अर्थात् ज्ञानम्। संसारे विद्यमानानां पदार्थानां ज्ञानम् अनेन एव कर्तुं शक्यते। न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। जगति ज्ञानस्योपेक्षया पवित्रं महत्त्वपूर्णं, किमपि नास्ति। धर्माधर्मयोः पापपुण्ययोर्भेदः अनेन एव अवगन्तुं शक्यते। वेदाः सर्वेषां मानवानां कल्याणहेतोः अभिप्रवृत्ताः। वैदिकवाङ्मये न केवलं धार्मिकविषयाः अपि तु सामाजिकः, नैतिकः, राष्ट्रोत्थानं, कौटुम्बिकविचारः, समता-नानाशास्त्राणाम् उद्गमश्च एकदेवतावादः, बहुदेवतावादः धर्मार्थकाममोक्षसाधनानि च प्रतिपादितानि। यथा अलौकिकानां विषयाणां प्रतिपादनं वेदेषु दृश्यते तथैव बहवः लौकिकविषयाः अपि वेदे निरूपिताः। वैदिकवाङ्मयमतिप्राचीनतमं वर्तते। प्राचीनकालादारभ्य अधुनापि गुरुशिष्यपरम्परया एव वेदपाठकाः वेदाध्ययनं कुर्वन्तः सन्ति । वेदोच्चारणे वर्णोच्चारणस्य विधिज्ञानं अत्यावश्यकं वर्तते। वर्णोच्चारणविधिना वैदिकाः सम्यक् वेदोच्चारणं कर्तुं शक्नुवन्ति। लौकिके वैदिके च उच्चारणे प्रभेदाः वर्तन्ते। तत्र केचन वेद-संरक्षणोपायाः सन्ति। तेषु प्रातिशाख्यानां महत्त्वपूर्णस्थानं विद्यते। प्रत्येकं वेदस्य प्रातिशाख्यग्रन्थाः वर्तन्ते। प्रायः बहवः ग्रन्थाः लुप्ताश्च। वेदोच्चारणपद्धतीनां केचन विशेषनियमाः वर्णिताः सन्ति। प्रातिशाख्यं व्याकरणमेव इत्युल्लेखोऽपि नागोजीभट्टेन अपि कृतोऽस्ति। प्रातिशाख्येषु व्याकरणनियमानाञ्च प्रतिपादनं दृश्यते। त्रिषु सामवेदीयप्रातिशाख्येषु ऋक्तन्त्रस्य प्रथमस्थानं विद्यते। ऋक्तन्त्रं सामवेदमन्त्रैः सम्मिलितमस्ति। अस्य सम्बन्धः राणायनीयकौथुमयोः सशाखाभ्यां वर्तते।

ऋक्तन्त्रप्रातिशाख्ये ऋक् अर्थात् साममन्त्रे आगतानां पदविषये विशेषनियमाः प्रतिपादिताः। ऋक्तन्त्रे कति वर्णाः भवन्ति ?। कानि च वर्णस्थानानि? कथं वर्णाः उच्चार्यन्ते?। इति प्रश्नाः भवन्ति। वेदानां संरक्षणार्थं नैके उपायाः विनिर्मिताः। मौखिकपरम्परया एव अस्याः संरक्षणं भवतीति दृश्यते।

वैदिकवाङ्मये प्रातिशाख्यस्य विशिष्टस्थानं वर्तते। **"शाखां शाखां प्रति प्रतिशाखं प्रतिशाखं भवं प्रातिशाख्यमिति। प्रतिशाखमधिकृतो ग्रन्थः प्रातिशाख्यम्"।** प्राचीनपरम्परानुसारं प्रातिशाख्यग्रन्थेषु शिक्षा,व्याकरणादि ग्रन्थेषु प्रतिपादितविषयाः समानतया एव अन्तर्भूताः सन्ति। **"शिक्षाविहितं व्याकरणविहितं चास्मिच्छास्त्रे उभयं यतः प्रक्रियते"** शिक्षाव्याकरणयोः विहितप्रक्रियायाः समावेशो प्रातिशाख्ये भवति। यास्कोक्तमिदं प्रातिशाख्यस्य प्रसिद्धं लक्षणं निरुक्ते सम्प्राप्यते **" पदप्रकृतीनि सर्वचरणानां पार्षदानि"।**

प्रातिशाख्यग्रन्थे उच्चारणविधीनां चिन्तनं प्रतिपाद्यते। तच्च अत्र उच्चारणविधेर्गौरवं दृष्ट्वा प्रस्तुते विषये विवेचनं क्रियते। एतेषां प्रातिशाख्यग्रन्थानां प्रमुखः विषयोऽस्ति । गुणानां ग्रहणार्थं दोषानां निराकरणार्थञ्च मन्त्राणां शुद्धोच्चारणं यथोक्तफलसिद्धये अभिव्यक्तः। शुध्दोच्चारणहेतोः गुणदोषानां विधेर्ज्ञानम् आवश्यकं वर्तते। ऋक्तन्त्रप्रातिशाख्येन उच्चारणनियमान् ,सन्धिविषयान्, स्वरभेदांश्च सामोदाहणेषु द्रष्टुं शक्नुमः। सामशिक्षायाः अपेक्षया अत्र केचन नवीनविषयाः प्रतिपादिताः। तेषु कुत्रचित् साम्यं वैषम्यञ्च दृश्यते। वेदोच्चारणपद्धति प्राचीना वर्तते। प्रातिशाख्येऽस्मिन् वर्णोत्पत्तिः, वर्णोच्चारणे वायोः महत्त्वं, वर्णस्थानानि, अक्षरसमाम्नायानाम् उपदेशः, मात्रायाः चिन्तनं दृश्यते। अथ **"वाचोवृत्ति व्याख्यास्यामः"** इत्यया व्याख्यया अथ शब्देन मङ्गलप्रार्थनया ऋक्तन्त्रस्य आरम्भः कृतः। आदौ वाचवृत्तिविषये अर्थात् उच्चारणस्य चिन्तनं, उच्चारणे वायोः स्वरूपम् , वायोर्विभेदाः महत्त्वञ्च प्रतिपाद्यन्ते।

**<u>वर्णोत्पत्तिः</u>**

सामवेदीय-नारदीयशिक्षायां वर्णस्थानानां चिन्तने प्राधान्येन मुख्यानि त्रीणि स्थानानि उक्तानि। तत्र गौणस्थानान्यपि विस्तरेण उक्तानि। अत एव सामवेदपाठकान् सन्देहो भवितुमर्हति। तदर्थमेव ऋक्तन्त्रप्रातिशाख्ये प्रत्येकं वर्णस्थानविषये सूत्राणि प्रतिपादितानि। वेदस्य प्रत्येकं शिक्षासु वर्णस्थानविषये किञ्चित् वैषम्यं प्रतीयते। तत्र च वेदानां त्रीणि मुख्यप्रयोजनानि सन्ति। प्रथमं वेदोच्चारणं, द्वितीयं यज्ञार्थ, तृतीयमनुसन्धानमिति एषु त्रिषु प्रयोजनेषु प्रथममुच्चारणम् अतीव महत्त्वपूर्णं वर्तते। गुरुमुखाद् वेदमन्त्रान् श्रुत्वा वेदोच्चारणं क्रियते स्म। केवलमुच्चारणमात्रेण मोक्षं लभते। वेदः साक्षात् शिवत्वेन स्वीक्रियते। तत्र वेदपाठकः शिवरूपेति शास्त्रवचनं विद्यते। अत एव उच्यते यत् **"तस्मात् सर्वप्रयत्नेन वेदमेव सदा पठेत्"।** पुनश्च यज्ञे सामगाः, मन्त्राः पठन्ति। तत्र उच्चारणे भूयमानानां दोषानां निवारणार्थम् इत्येतदर्थम् इमानि प्रातिशाख्यानि विनिर्मितानि सन्ति। अत एव उच्चारणविषये पाणिनीय शिक्षायां इदं प्रमाणमुपलभ्यते।

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥**

वर्णोत्पत्तिविषये ऋक्तन्त्रे गभीरं चिन्तनं वर्तते। सामवेदे ऋचां वा गानमन्त्राणाम् उच्चारणे स्वरे च नैके भेदाः वर्तन्ते। अत एव अन्यत्संहितापेक्षया वर्णोत्पत्तिक्रमः किञ्चित् भिन्नो दृश्यते। सामवेदीय प्राचीनाचार्याणां मते वायुः एव ध्वनिरुत्पत्तेः मूलमस्ति **"वायुं प्रकृतिमाचार्याः"** अत्र आचार्यापदेन गोभिलादयः सामवेदीयाचार्याः गृह्यन्ते सामवेदीयाः। वायुः पुनश्चोत्पत्त्यवसरे श्वासो भवति। ततश्च नादो भवति। **"श्वासो नाद इति शाकटायनः"**। अयं वायुः सम्पूर्णे शरीरे सर्वत्र भ्रमति पुनश्च श्वासो भूत्वा नादरूपेण विभिन्नस्थानेषु अवयवघातैः, प्रतिघातैश्च वर्णमुत्पादयति। **एवमुत्पन्नानां वर्णानां उपदेशोद्देशः।**ऋक्तन्त्रे वर्णानामुच्चारणोपदेशः एव उद्देशो वर्तते। तत्र पाणिनीयशिक्षायां उत्पत्तिक्रमो वर्तते। तद्यथाह-

**आत्माबुद्ध्यासमेत्यर्थान् मनोयुङ्क्ते विवक्षया।मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।।**

अत्रापि वायोः महत्त्वं प्रतिपादितम्। वायोः स्पर्शादेव स्थानवैविध्यं भवति एकेन वायुना नाना वर्णाः उत्पद्यन्ते।

**स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः। इति वर्णविदः प्राहुर्निपुणं तन्निबोधत।।**

**<u>वर्णोपदेशः</u>**

प्रत्येकं शाखासम्बद्धम् उच्चारणं तद् तद् प्रातिशाख्ये क्रियते। आरम्भे वर्णोपदेशः क्रियते। वेदोच्चारणे वेदस्य लघु तथा आद्यावयवाः वर्णा एव। ते यथा- अ इति आ इत्यादिनि समानानि। ए ,ऐ,ओ,औ इति सन्ध्यक्षराणि। आयाहीवोयीनाम् (१.१) गतिरन्त इति स्वराः अथ व्यञ्जनानि। कवर्गः चवर्गः, टवर्गः, तवर्गः, पवर्गः इति स्पर्शाः। अथान्तस्थाः,अन्तस्थाः। अथोष्माणो, योगवाहाः। अथायोगवाहाः। अः इति विसर्जनीयः। क इति जिह्वामूलीयः। प इत्युपध्मानीयः। हुमित्यनुनासिकः। अथ यमाः कुं इति खुं इति गुं इति घुमिति यमाः। अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वगुणः। अं आं इत्यनुस्वारौ।

**प्रयत्नद्वयं वर्तते आभ्यन्तरो बाह्यश्च-**स्पृष्टं करणं स्पर्शानाम्। दुस्पृष्टमन्तस्थानाम्। विवृतं स्वरोष्मणाम्। विवृततरमकारैका-रौकाराणाम्। संवृतो घोषवान् विवृतो घोषो नादानुप्रदानाः स्वरघोषवन्तः श्वासो घोषाणाम् तनीयान् प्रथमानामुभौ ह चतुर्थाना संनिवेशोऽन्यः। एवमुपदेशे स्वराणा सन्ध्यक्षराणां दीर्घाणां ह्रस्वानां समानानामन्तस्थानामुत्तमानां स्वरान्तस्थोत्तमानामकार-घोषाणां हकारस्तु घोषवतामघोषाणां सोष्मणामूष्मणाञ्च प्रत्याहारे रहयोर्वर्गसंज्ञानुस्थानानामसिद्धिरिति चेध्रस्वरवतरनासिक्यस्थानेषु मात्राकरणविशिष्टनामपि प्राप्तिस्तथा सिद्धिमिति।

**<u>वर्णोच्चारणस्थानादि चिन्तनम्</u>**

**उरःकण्ठश्शिरश्चैव स्थानानि त्रीणि वाङ्मये।**

**सवनान्याहुरेतानि साम्नश्चाप्यधरोत्तरे।।**

सामवेदीय-नारदीय-शिक्षायां प्राधान्येन त्रीणि स्थानानि उल्लिखि-तानि। एवञ्च पाणिनीय शिक्षायां अष्टस्थानानि निर्दिष्टानि सन्ति।

**अष्टौ स्थानानि वर्णानामुरः कण्ठशिरस्तथा। जिव्हामूलञ्च दन्ताश्च नासिकस्थानमुच्यते।।**

ऋक्तन्ते अकारादीनां वर्णस्थानानाञ्च गहनं चिन्तनं वर्तते ।

**ऋक्तन्ते वर्णस्थानसम्बद्धानि सूत्राणि**

**२ हा: कण्ठे। ३.उरसि विसर्जनीयो वा ४.जिह्वामूले कृ ५.तालुनि श्च्ये ६.मूर्धनि षटौ ७.दन्त्ये त्स्ला: ८.रेफो मूले वा ९.** ओष्ठ्ये **वो: पू १०.अविशेषस्थानौ संस्वादनिगारौ ११. नासिकाया यमानुस्वारना-सिक्या:**हकार अकार-आकार-विसर्जनीया: कण्ठस्थाना:। उरसि विसर्जनीयस्तिष्ठति। जिह्वामूलीयस्था जिह्वामूलस्थाना: ककार-ऋकार-ॠकारा:। तालुस्थाना: शकार-चकार-यकार-इकार-ईकार-एकारा:। मूर्धनि षटौ तिष्ठत:। दन्तस्थानास्तकार-सकार-लकारा:। रेफस्तु दन्त्यो दन्तमूले वा। ओष्ठ्यस्थाना वकार -ओकार-औकार -उपध्मानीय-पकार-उकार-ऊकारा: किटकिडाकारो हन्वां तिष्ठति। अविशेषस्थानौ भवत: सर्वस्थानप्राप्तौ संस्वादनिगारौ। पकार-नकार-यकारा-वा संस्वादे। हकार-मकार-नासिक्या- वा निगारे। नासिकास्थाना भवन्ति यमानुस्वारनासिक्या:। लौकिकव्याकरणे अकुहविसर्जनीयानां कण्ठ: इति व्याख्याधारेण भवति ।

**ऋक्तन्त्रगत-वर्णाः स्थानानि च**

| स्वरा: | ऋक्तन्त्रप्रातिशाख्यमतेन | ऋक्प्रातिशाख्यमतेन | पाणिनीयमतेन |
|---|---|---|---|
| अ, आ | कण्ठः | कण्ठः | कण्ठः |
| इ, ई | तालु | तालु | तालु |
| उ, ऊ | ओष्ठः | ओष्ठः | ओष्ठः |
| ऋ, ॠ | जिव्हामूलम् | जिव्हामूलम् | मूर्धा |
| ऌ | जिव्हामूलम् | जिव्हामूलम् | दन्तः |
| ए ऐ | तालु | जिव्हामूलम् | कण्ठतालु |
| ओ औ | ओष्ठः | ओष्ठः | कण्ठोष्ठम् |
| बिसर्जनीय: | कण्ठः,उरः | उरः, कण्ठ | कण्ठः |
| =क=ख | कण्ठः | जिव्हामूलम् | जिव्हामूलम् |
| =प=फ | ओष्ठः | ओष्ठः | ओष्ठः |
| व्यञ्जनानि | | | |
| कवर्ग: | जिव्हामूलम् | जिव्हामूलम् | कण्ठः |
| चवर्ग: | तालु | तालु | तालु |
| टवर्ग: | मूर्धा | मूर्धा | मूर्धा |
| तवर्ग: | दन्तः | दन्तः | दन्तः |
| पवर्ग: | ओष्ठः | ओष्ठ | ओष्ठ |
| य | तालु | तालु | तालु |
| र | दन्तमूलम् | दन्तमूलम् | मूर्धा |
| ल | दन्तः | दन्तमूलम् | दन्ताः |
| व | ओष्ठः | ओष्ठ | दन्तोष्ठम् |
| श | तालु | तालु | तालु |
| ष | मूर्धा | मूर्धा | मूर्धा |
| स | दन्तः | दन्तमूलम् | दन्ताः |
| ह | कण्ठः | कण्ठः,उरः | कण्ठः |

**मात्राणां चिन्तनम्**

**८.मात्रार्द्धमात्रा वा।**

**निमेषो मात्राकालः स्याद्विद्युत्कालस्तथा परे।**

**अक्षरात्तुल्ययोगाच्च मति स्यात्सोमशर्मणः।।**

नेत्रकनीनिकास्फुरणोचितः कालःमात्रा इति उच्यते। सोमशर्मा आचार्य मतेन विद्युत् इति पदेन विद्युत्स्फुरण चाकचिक्यरूपेण प्रकाशनं सः काल मात्रा इति उच्यते। "मीयन्ते मान्तीति मात्राः" इति सायणभाष्ये, "यदेव मिमीते तस्मान् मात्रा" इत्यादयः व्याख्याः शास्त्रेषु निगदिताः। "मात्रार्द्धमात्रा" वा इत्यनेन सूत्रेण सूच्यते यत्, व्यञ्जनवर्णः एकमात्रिकं वा अर्धमात्रिकं भवति। व्यञ्जनम् अर्धमात्रिकमिति लौकिकव्याकरणे प्रसिद्धम्। शास्त्रे मात्रा विषये नैका: व्याख्या: सम्भवन्ति। तत्र मात्राया: व्याख्या विषये वैषम्यं दृश्यते। किं नाम मात्रा? अत्र मात्राविषये प्राचीनं प्रमाणमुपलभ्यते। वैदिकपाठावसरे वैदिका: जानौ हस्तं परिभ्राम्यति स्म। क्रियाया: काल: कविभि: मात्रा इति प्रोक्ता।

**त्रिकं वा द्विमात्रं वा स्वर्यते यदिहाऽक्षरम्। तस्यादितोऽर्द्धमात्रा वैशेषन्तु परतो भवेत्।।**

**एकमात्रो भवेद् ह्रस्वः द्विमात्री दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनचार्धमात्रिकम्।।**

**३१.द्रुतायां मात्रा -**द्रुतायां वृत्तौ मात्रा त्रिकला भवति। सामवेदोच्चारणे तिस्र: वृत्तय: सन्ति।१.द्रुता,२.मध्यमा,३. विलम्बिता

**अभ्यासार्थे द्रुतां वृत्ति प्रयोगार्थे तु मध्यमाम्। शिष्याणामुपदेशार्थे कुर्याद्वृत्ति विलम्बिताम्।।**

अभ्यासे द्रुतां, प्रयोगार्थे मध्यमा, शिष्योपदेशे विलम्बिता वृत्तिं प्रयोजयेत्। सामवेदीय नारदीयशिक्षायां मन्त्रोच्चारणस्य तिस्र: वृत्तयः प्रोक्ता:। लौकिकसङ्गीतेऽपि तिसृभिः पद्धभिः गानं क्रियते। प्राचीना इयं पद्धति अद्य यावता काले वयं दृष्टुं शक्नुम:। वेदपाठका: स्वाध्यायावसरे द्रुतां वृत्तिम् आचरेत्। गुरुपरम्परया अध्येतार: द्रुतवृत्यां वेदोच्चारणं कर्तुं शक्यन्ते न तु सामान्या:। यागादी प्रयोगावसरे याज्ञिकाः मध्यमावृत्तिम् आचरेयुः। अध्यापनसमये वैदिका: नवीनाः भवन्ति एतदर्थं कथमुच्चारणं करणीयं, कथं स्वराणां सञ्चालने शङ्का उत्पद्यते। प्राधान्येन आचार्याणां मार्गदर्शनं भवति। तदनुगुणं शिष्या: पठन्ति। सम्यक् पाठार्थं, पाठदोषनिवारणार्थं विलाम्बिता वृत्तिमाचरेदिति। अनेन उच्चारणहानिः न भविष्यति ।

**सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम्।**

**सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्मराजते।**

एवं प्रकारेण सम्यक् सस्वरवर्णोच्चारणे कृते सति यथोक्तफलं प्राप्य मनुजः ब्रह्मराजते ।

**निष्कर्ष:-** ऋक्तन्त्र सामवेदस्य मौलीभूतं प्रातिशाख्यं वर्तते अस्य प्रातिशाख्यग्रन्थस्य अनध्ययनात् प्रातिशाख्यग्रन्थानां न हानि: स्याद्, अपि तु वेदस्वरमात्राणाम् उच्चारणहानिः स्यात्। सामउद्गातृणां मन्त्रपारायणे वा अनध्ययनाच्च मन्त्रोच्चारणे दोषाः न भवेदिति हेतोः वेदपाठका: सम्यक् उच्चारणविधिश्च आचरेयुः। वेदपाठावसरे भूयमानान् दोषान् निवारयितुं शक्ष्यन्ते। सामगात्रा अवश्यमेव प्रातिशाख्यमिदमध्येतव्यमिति अस्य शोधपत्रस्य आशयो वर्तते।

**उपसंहार:-** अस्मिन् शोधपत्रे ऋक्तन्त्रपरिचयः, सामवेदीय-ऋक्तन्त्रोक्तवर्णोच्चारणविधीनां विमर्शः समुक्ता, वर्णस्थानानाम् उच्चारणपद्धतिनां प्रतिपादनं कृतमस्ति।

इति शम्।

**सन्दर्भा:-**

१) श्रीमद्भगवद्गीता ४.३८

२) मनुस्मृतिः २.६

३) पाणिनीयशिक्षा – ५२

४) पाणिनीयशिक्षा –

५) पाणिनीयशिक्षा- ६

६) नारदीयशिक्षा -६

७) पाणिनीयशिक्षा -८

८) ऋक्तन्त्रम्-२-११ सू.

९) नारदीयशिक्षा -२.६.२१

१०)ऋक्तन्त्रम्-३१ सू.

११)पाणिनीयशिक्षा -५१

**सम्बद्ध-साहित्य-परिशीलनम्**

**मूलस्त्रोतांसि**

- **ऋक्तन्त्रम्-** डा.सूर्यकान्त मेहरचन्द लक्षणदास - दिल्ली १९७०
- **अष्टाध्यायी** -चौखम्बा संस्कृत संस्थानम्, वाराणसी

**अन्यस्रोतांसि**

- **ऋक्तन्त्रम्** -सभाष्य-सम्पादनं तथा सङ्कलनं, डॉ. गिरिराजप्रसाद षडङ्गी -तिरुपति
- **ऋक्तन्त्र एक परिशीलन** -डा. सुरेशप्रकाश-पाण्डेय, परिमल-पब्लिकेशन,दिल्ली-१९९
- **ऋग्वेदप्रातिशाख्य**-हिन्दि व्याख्या सहित ,भारतीय विद्या प्रकाशन – डॉ. व्रजबिहारी चौबे
- **पाणिनीय-शिक्षा-** चौखम्बा संस्कृत संस्थान, वाराणसी
- **सामतन्त्रम्-** हिन्दि व्याख्योपेतम् सम्पूर्णानन्द-संस्कृत-विश्व-विद्यालय–वाराणसी-२०१६ सम्पादक: तथा व्याख्याकार: प्रो. शारदा चतुर्वेदी